श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्री मेल्पत्तूर् नारायणभट्टतिरि विरचितम्

# ॥ श्रीमन्नारायणीयम् ॥

## दशक - २९

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the Wikner font.

श्रीः

श्रीमते कृष्णाय परब्रह्मणे नमः

श्रीमते रामानुजाय नमः

# ॥ श्रीमन्नारायणीयम् ॥

## दशक - २९

*देवानाममृतोपलब्धिप्रकारवर्णनम्*

उद्गच्छतस्तव करादमृतं हरत्सु दैत्येषु तानशरणाननुनीय देवान्।
सद्यस्तिरोधिथ देव भवत्प्रभावादुद्यत्स्वयूथ्यकलहा दितिजा बभूवुः॥ १ ॥

श्यामां रुचाऽपि वयसाऽपि तनुं तदानीं
  प्राप्तोऽसि तुङ्गकुचमण्डलभङ्गुरां त्वं
पीयूषकुम्भकलहं परिमुच्य सर्वे
  तृष्णाकुलाः प्रतिययुस्त्वदुरोजकुम्भे॥ २ ॥

का त्वं मृगाक्षि विभजस्व सुधामिमामि-
  त्यारूढरागविवशानभियाचतोऽमून्।
विश्वस्यते मयि कथं कुलटाऽस्मि दैत्या
  इत्यालपन्नपि सुविश्वसितानतानीः॥ ३ ॥

मोदात् सुधाकलशमेषु ददत्सु सा त्वं
  दुश्चेष्टितं मम सहध्वमिति ब्रुवाणा।
पङ्क्तिप्रभेदविनिवेशितदेवदैत्या
  लीलाविलासगतिभिः समदाः सुधां ताम्॥ ४ ॥

अस्मास्वियं प्रणयिनीत्यसुरेषु तेषु जोषं स्थितेष्वथ समाप्य सुधां सुरेषु।
त्वं भक्तलोकवशगो निजरूपमेत्य स्वर्भानुमर्धपरिपीतसुधं व्यलावीः॥ ५ ॥

त्वत्तः सुधाहरणयोग्यफलं परेषु
  दत्वा गते त्वयि सुरैः खलु ते व्यगृह्णन्।

घोरेऽथ मूर्छति रणे बलिदैत्यमाया-
व्यामोहिते सुरगणे त्वमिहाविरासीः॥ ६ ॥

त्वं कालनेमिमथ मालिमुखान् जघन्थ
शक्रो जघान बलिजम्भवलान् सपाकान्।
शुष्कार्द्रदुष्करवधे नमुचौ च लूने
फेनेन नारदगिरा न्यरुणो रणं त्वम्॥ ७ ॥

योषावपुर्दनुजमोहनमाहितं ते
श्रुत्वा विलोकनकुतूहलवान् महेशः।
भूतैस्समं गिरिजया च गतः पदं ते
स्तुत्वाऽब्रवीदभिमतं त्वमथो तिरोधाः॥ ८ ॥

आरामसीमनि च कन्दुकघातलीला-
लोलायमाननयनां कमनीं मनोज्ञाम्।
त्वामेष वीक्ष्य विगळद्वसनां मनोभू-
वेगादनङ्गरिपुरङ्ग समालिलिङ्ग॥ ९ ॥

भूयोऽपि विद्रुतवतीमुपधाव्य देवो वीर्यप्रमोक्षविकसत्परमार्थबोधः।
त्वन्मानितस्तव महत्वमुवाच देव्यै तत्तादृशस्त्वम वातनिकेतनाथ॥ १० ॥

**********